द्यूतस्थाने, पाशकाधारे फलके च । अक्षस्य रथचक्रक्षुण्णस्थानस्येव वाटः । मल्लभूमौ तत्र हि रथचक्रक्षुण्णपांशुसदृशपांशुमत्त्वात् तत्सदृशत्वम् ।

**अक्षविद्** त्रि० अक्षं पाशकक्रीडां व्यवहारं वा वेत्ति विद-क्विप् । अक्षविद्याभिज्ञे व्यवहाराभिज्ञे च अक्षवेत्त्रादयोऽप्यत्र । स्त्रियाम् अक्षवेत्त्री ।

**अक्षविद्या** स्त्री ६त० । पाशकादिद्यूतविद्यायाम् ।

**अक्षवृत्त** न० अक्षं राशिचक्ररूपं वृत्तं वेष्टनाकारं कोणशून्यं क्षेत्रम् । राशिचक्ररूपे वृत्तक्षेत्रे । अक्षे पाशकक्रीडायां वृत्तः व्यापृतः ७त० । पाशकक्रीडासक्ते "यदक्षवृत्तमनु दत्तं न एतदिति" श्रुतिः । [द्यूतक्रीडाकुशले ।

**अक्षशौण्ड** पु० अक्षेषु तत्क्रीडायां शौण्डः प्रवीणः ७त० ।

**अक्षसूत्र** न० अक्षस्य जपमालायाः सूत्रम् । जपमालाश्रयसाधने सूत्रे "साक्षसूत्रकमण्डलुरिति" पुराणम् ।

**अक्षाग्रकीलक** न० अक्षस्य रथनाभिक्षेत्रस्याग्रनद्धं कीलकम् । ६त० । चक्रनाभिक्षेत्राग्रप्रोते कीलके ।

**अक्षानह्** न० अक्षे चक्रे आनह्यते बध्यते आ+नह-क्विप् । चक्रसंबद्धे काष्ठभेदे । "अक्षानहो नह्यतनोत सोम्या" इति वेदः । [क्रोधे च । न०ब० । क्षमाशून्ये त्रि० ।

**अक्षान्ति** स्त्री० क्षम-क्तिन् विरोध्यर्थे न०त० । ईर्ष्यायां,

**अक्षारलवण** त्रि० क्षारेण उषरमृत्तिकया निर्वृत्तं अण् क्षारं कृत्रिमं लवणं न०त० । अकृत्रिमलवणे "मुन्यन्नानि पयः सोमोमांसं यच्चानुपाकृतम् । अक्षारलवणञ्चैवेति" मनुः । "चतुर्थकालमश्नीयादक्षारलवणं तथेति" मनुः अक्षारलवणमकृत्रिमलवणमितिप्राय० रघु० । क्षारलवणभिन्ने सैन्धवलवणे न० । "नैतस्यां रात्रावन्नं पचेयुस्त्रिरात्रमक्षारलवणान्नाशिनः स्युर्द्वादशरात्रं महागुरुष्विति, आश्वलायनगृह्यम् । अक्षारलवणं क्षारमृत्तिकादि-कृतलवणभिन्नं सैन्धवं सम्भारि चेति गृ० रघु० । "गोक्षीरं गोघृतञ्चैव धान्यमुद्गास्तिलायवाः । सामुद्रं सैन्धवञ्चैव अक्षारलवणं स्मृतम्" इति स्मृत्युक्ते गोघृतादिद्रव्यगणे च ।

**अक्षावपन** न० अक्षान् पाशकान् आवपति क्षिपत्यस्मिन् आ+वप-आधारे ल्युट् ६त० । पाशकपातनाधारे फलके ।

**अक्षावली** स्त्री ६०त० । जपसाधन-रुद्राक्षवीजावलौ जपमालायाम् "रक्षावलीमिवाक्षावलीं कण्ठेनोद्वहन्ती" तिकाद० ।

**अक्षावाप** त्रि० अक्षान् पाशकान् आवपति क्षिपति आ+वप-अण् उप०स० । द्यूतकारके, तदध्यक्षे च ।

**अक्षि** न० अश्नुते विषयान् अश-क्सि । नेत्रे, इन्द्रियमध्ये तस्यैव विषयदेशं प्राप्य विषयग्राहकत्वं सर्व्ववादिसम्मतमन्येषान्तु सर्वमते न तथात्वमतोऽस्य विषयव्यापकता । एतदन्तबहुव्रीहेः स्वाङ्गपरत्वे षजन्तता पद्माक्षः पद्माक्षी, अस्वाङ्गपरत्वे अजन्तता दीर्घाक्षा वेणुयष्टिः, अव्ययीभावे अजन्तता प्रत्यक्षं समक्षमित्यादि तत्पुरुषे ऽस्वाङ्गपरत्वेऽजन्तता गवाक्षः । इदञ्च शब्दादिषु वाह्येन्द्रियग्राह्यविशेषगुणेषु मध्ये रूपस्यैव ग्राहकतया तैजसं नेत्रगोलकेऽधिष्ठितं किञ्चित् वस्तु । तैजसत्वाच्चास्य सूर्य्यादिकिरणवदाशुदूरपर्य्यन्तानुधावनमागमनञ्च । तच्च परमाणुतुल्यमिति नैयायिदयः तदपेक्षया स्थूलमिति सांख्यादयः । उभयमतेऽपि न तस्य प्रत्यक्षयोग्यता । तदाधारगोलके द्वे वाह्ये आन्तरणि च चत्वारि कोशवत् पटलानि, मांसादयः पञ्चांशाः, पक्ष्मादीनि पञ्च मण्डलानि षट् सन्धयश्च सन्ति । तद्विवरणं यथा "विद्याद्द्व्यङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसम्मितम् । द्व्यङ्गुलं सर्व्वतः सार्द्धं भिषग्नयनवुद्बुदम् ॥ सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम् । पलं भुवो, ऽग्नितो, रक्तं, वातात् कृष्णं, सितं जलात् ॥ आकाशादश्रुमार्गाश्च जायन्ते नेत्रवुद्बुदे । दृष्टिञ्चात्र तथा वक्ष्ये यथावादीद्विशारदः ॥ नेत्रायामत्रिभागन्तु कृष्णमण्डलमुच्यते । कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः ॥ मण्डलानि च सन्धींश्च पटलानि च लोचने । यथाक्रमं विजानीयात् पञ्च षट् च षडेव च ॥ पक्ष्मवर्त्मश्वेतकृष्णदृष्टीनां (५) मण्डलानि तु । अनुपूर्व्वन्तु तन्मध्यास्त्वारोऽन्ये यथोत्तरम् ॥ पक्ष्मवर्त्मगतः सन्धिर्वर्त्मशुक्लगतोऽपरः । शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोऽपरः ॥ ततः कनीनकगतः षष्ठश्चापाङ्गगः स्मृतः । द्वे वर्त्मपटले विद्याच्चत्वार्य्यन्यानि चाक्षिणि । जायते तिमिरं येषु व्याधिः परमदारुणः । तेजोजलाश्रितं वाह्यं तेष्वन्यत् पिशिताश्रितम् ॥ मेदस्तृतीयं पटलमाश्रितन्त्वक्षि चापरम् । पञ्चमांशसमं दृष्टेस्तेषां बाहुल्यमिष्यते इति सुश्रुते ॥

**अक्षिक** पु० अक्षाय चक्रावयवाय हितम् ठन् । रञ्जनद्रुमे (आतइच) । [तारायाञ्च ।

**अक्षिकूटक** न० अक्ष्णः कूट इव कन् । नेत्रगोलके नेत्र-

**अक्षिगत** त्रि० अक्ष्णि गतः सर्व्वदाभावनावशादत्यर्सन्निकृष्टोऽपि उपस्थित इव । द्वेष्ये शत्रौ नेत्रगोचरे च । "त्वयि किलाक्षिगते नयनैस्त्रिभिरिति नै० । [तुल्यत्वम् ।

**अक्षितर** न० अक्षीव तरति तृ-अच् । जले निर्म्मलत्वान्नेत्र

**अक्षिभू** स्त्री अक्ष्णः भूर्विषयः । चक्षुर्गोचरे प्रत्यक्षे, सत्ये